## भारतीय शिक्षा बोर्ड

### आदर्शकार्यपत्रकम् – प्रथममेककम्

### संस्कृतम् – कक्षा-६

वर्षः- २०२६-२७

**निर्धारितसमयः – एकहोरा** **अधिकतमाङ्काः – २०**

---

**सामान्यनिर्देशाः —**

- प्रश्नान् ध्यानेन पठत।
- प्रश्नपत्रं पठितुं १० निमेषस्य अतिरिक्तः समयः निर्धारितः अस्ति। अस्मिन् काले छात्राः केवलं प्रश्नपत्रं पठिष्यन्ति।
- प्रश्नपत्रे सम्पूर्णाः चत्वारः खण्डाः सन्ति। प्रत्येकं खण्डे एकः प्रश्नः अस्ति।
- खण्डः 'क' अस्मिन् एकः प्रश्नः। तत्कृते ५ अङ्काः निर्धारिताः सन्ति।
- खण्डः 'ख' अस्मिन् एकः प्रश्नः। तत्कृते ५ अङ्काः निर्धारिताः सन्ति।
- खण्डः 'ग' अस्मिन् एकः प्रश्नः। तत्कृते ५ अङ्काः निर्धारिताः सन्ति।
- खण्डः 'घ' अस्मिन् एकः प्रश्नः। तत्कृते ५ अङ्काः निर्धारिताः सन्ति।

**सामान्य निर्देश—**

- प्रश्नों को ध्यान से पढ़ें।
- प्रश्नपत्र को पढ़ने के लिए 10 मिनट का अतिरिक्त समय दिया गया है। इस दौरान छात्र केवल प्रश्नपत्र पढेंगे।
- इस प्रश्न पत्र में कुल चार खण्ड हैं। प्रत्येक खण्ड में 1 प्रश्न है।
- खण्ड 'क' में एक प्रश्न जिसकी प्रश्न संख्या 1 है। इसके लिए 5 अंक निर्धारित किये गये हैं।
- खण्ड 'ख' में एक प्रश्न जिसकी प्रश्न संख्या 2 है। इसके लिए 5 अंक निर्धारित किये गये हैं।
- खण्ड 'ग' में एक प्रश्न जिसकी प्रश्न संख्या 3 है। इसके लिए 5 अंक निर्धारित किये गये हैं।
- खण्ड 'घ' में एक प्रश्न जिसकी प्रश्न संख्या 4 है। इसके लिए 5 अंक निर्धारित किये गये हैं।

---

## खण्डः-क (अपठितावबोधनम् )

1. एकदा काकः पिपासितः आसीत्। सः जलं पातुम् इतस्ततः अभ्रमत्। तदा सः एकं घटम् उद्याने अपश्यत्। घटे स्वल्पं जलम् आसीत्। अतः सः जलं पातुम् असमर्थः अभवत्। सः एकम् उपयम् अचिन्तयत्। सः घटे पाषाणस्य खण्डानि अक्षियत्। जलम् उपरि आगच्छत्। काकः जलं पीत्वा सन्तुष्टः अभवत्। **5**

**प्रश्नाः—** **1×5=5**

(क) एकदा काकः कीदृशः आसीत्?

(ख) सः एकं घटं कुत्र अपश्यत्?

(ग) घटे स्वल्पं किम् आसीत्?

(घ) सः घटे कस्य खण्डानि अक्षिपत्?

(ङ) उपर्युक्त-गद्यांशस्य उचितं शीर्षकं लिखत।

## खण्डः-ख (रचनात्मकलेखनम्)

2. अधोलिखितपदानि यथायोगं स्थापयित्वा वाक्यं रचयत— **1×5=5**

(क) देशः / अस्ति / भारतम् / अस्माकम्।

(ख) ब्राह्मणी / शय्यायां / अथैकदा / शाययित्वा / पुत्रं / उवाच।

(ग) पुत्रः / अयं / रक्षणीयः / त्वया / नकुलाद्।

(घ) विभेति / न / रात्रिः / कदापि।

(ङ) कूजन्ति / मधुरं / पिकाः / उपवनेषु।

## खण्डः-ग (अनुप्रयुक्त-व्याकरणम्)

3. अधोलिखितवाक्यानां मातृभाषया अनुवादं कुरुत— **1×5=5**

(क) अस्माकं देशः भारतम् अस्ति।

(ख) धीरः समीरः प्रवहति।

(ग) उपवनेषु पिकाः मधुरं कूजन्ति।

(घ) वर्षासु मेघाः वारीणि वर्षन्ति।

(ङ) नकुलः सर्पं खण्डशः कृतवान्।

## खण्डः-घ (पठितावबोधनम्)

4. निम्नलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत— **05**

कस्मिंश्चिद् अधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्या प्रसूता सुतम् अजनयत्। तस्मिन् एव दिने नकुली नकुलं प्रसूय मृता। अथ सा सुतवत्सला तं नकुलम् अपि दारकवत् दुग्ध-दानाभ्यङ्ग-मर्दनाभिः पुपोष। अथ एकदा ब्राह्मणी शय्यायां पुत्रं शाययित्वा जलकुम्भम् आदाय पतिम् उवाच— ब्राह्मण! जलम् आनेतुम् अहं तडागं यास्यामि। त्वया पुत्रोऽयं नकुलाद् रक्षणीयः।

(क) एकेन पदेन उत्तरयत— **1/2×2=1**

(i) तस्य भार्या प्रसूता कम् अजनयत्?

(ii) त्वया अयं पुत्रः कस्माद् रक्षणीयः?

(ख) पूर्णवाक्येन उत्तरयत— **1×2=2**

(i) सा सुतवत्सला तं नकुलं किमिव पुपोष?

(ii) देवशर्मा नाम ब्राह्मणः कुत्र प्रतिवसति स्म?

(ग) भाषिकाः प्रश्नाः— **1×2=2**

(i) नकुली कं प्रसूय मृता?

अ. पुत्रम् ब. जलकुम्भम् स. नकुलम्।

(ii) ब्राह्मणी पुत्रं शाययित्वा किम् आदाय पतिम् उवाच?

अ. जलकुम्भम् ब. नकुलम् स. तडागम्।